# Rashtrarakshavidhau Yasti Kashtha Para

# राष्ट्ररक्षाविधौ यास्ति काष्ठा परा

## Document Information

Text title : Rashtrarakshavidhau Yasti Kashtha Para

File name : rAShTrarakShAvidhauyAstikAShThAparA.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Dr. ichChArAma dvivedI "praNava"

Transliterated by : Volunteers at Bharat Vikas Parishad https://bvpindia.com

Acknowledge-Permission: Bharat Vikas Parishad https://bvpindia.com Atam Dev

Latest update : October 18, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 18, 2019

*sanskritdocuments.org*

# राष्ट्ररक्षाविधौ यास्ति काष्ठा परा

राष्ट्ररक्षाविधौ यास्ति काष्ठा परा
वन्द्यते सा मया वीरताया धरा,
स्वाभिमानादृते नास्ति किञ्चित्प्रियं देशसेवाविधौ दीयेत जीवनं
गौरवायैव देशस्य यैरर्प्यते स्वं मनः, स्वा तनुः धनं सन्ततम् ।
वीरपुत्राप्रसूः धीरता निर्भरा
वन्द्यते सा मया वीरताया धरा
यत्रा राणाप्रतापस्य पादध्वनिः मातृभूः वक्षसि स्पन्दते सर्वदा
यत्रा हममीरदेवस्य शस्त्राच्छटा दिक्षु विद्योतते सर्वदा मोददा
शत्राविध्वंसयज्ञेषु बद्धादरा
वन्द्यते सा मया शूरताया धरा,
यत्रा भक्तिस्वरूपा हि मीरा पपौ कृष्णप्रेमामृतं, ब्रह्मसायुज्यदं
पाययन्ती सुधा भक्तिसर्घैन्तिभिः पावयन्तीस्थिता या हि भूमण्डलं
श्रीहरेः प्रेमपीयूषपाने रता
वन्द्यते सा मया भक्तिपूर्णधरा
संस्कृतिर्भारतीया सदा पाल्यते संस्कृतं जीवनञ्चापि सन्धार्यते
धर्मकर्मान्विता यत्समाजप्रथा विश्रुता विश्वमञ्चे यदीया कथा

- डॉ इच्छाराम द्विवेदी “प्रणव”

*Rashtrarakshavidhau Yasti Kashtha Para*
pdf was typeset on October 18, 2019

Please send corrections to *sanskrit@cheerful.com*